“इन्द्रियाणि वीर्य्याणि व्युदक्रामन्” शत०ब्रा०१२।७।१।९। “व्युत्क्रान्तरजसोऽमलाः” भा० अनु० १२१९श्लो०। “व्युत्क्रमात् प्रेतश्राद्धानि योमोहात् धर्म्ममोहितः” ति० त० देवलः।

उप+आरम्भे सक० आत्म०। उपक्रमते आरभते इत्यर्थः। “उपक्रमस्व पुरुरूपमाभर वाजम्” ऋ० ८।१।१४। “उपक्रमोपसंहारौ” वेदान्तसा०। “योयस्य विहितः कालः कर्म्मणस्तदुपक्रमे। तिथिर्याऽभिमता सा तु कार्य्या नोपक्रमोज्झिता” बौधा०। गत्यर्थमात्रद्योतकत्वे नात्मनेपदम् “मागधेषूपचक्राम भगवांस्तत्र कौशिकः” भा० स० १८अ०। अप्रतिबन्धे उत्साहे वृद्धौ च आत्म०। क्वचि उपक्रमते बुद्धिः न प्रतिहन्यते इत्यर्थः; अध्ययनाय उपक्रमते उत्सहते। उपक्रमन्ते शास्त्राणि स्फीतानि भवन्ति इत्यर्थः। एवं परापूर्ब्बकस्य केवलस्य च एष्वर्थेषु अकर्म्मकता आत्मनेपदञ्च। अन्योपसर्गपूर्वकत्वे तत्तदर्थेषु, परोपपूर्ब्बस्यार्थान्तरे च न तङ्। उपसर्गराहित्ये अन्यार्थेऽपि वा तङ्। क्रामति क्रमते इति। आङि तु ज्योतिरुद्गमने आत्मनेपदमिति भेदः। विपूर्ब्बकस्य विशेषो वक्ष्यते समादिपूर्ब्बकोपसर्गस्य तत्तदर्थविशिष्टारम्भद्योतकता। वक्तुं समुपचक्रमे।

नि+नितरां क्रमणे अवश्यक्रमणे। “कर्म्मन् वाजी न्यक्रमीत्” ऋ० ६।२६।१। “न्यक्रमीत् नितरामक्रमीत्” भा०

अनु+नि+अनुक्रमणे। “सप्तपदान्यनुनिक्रामति” शत० ब्रा० ३।३।१।१।

निर्(स्)+निस्सरणे “जिगीषया महीं पाण्डुर्निरक्रामत् पुरात् प्रभो!” भा०आ०११२अ०। अस्य क्वचिदात्मनेपदित्वम् “वाताप्रे! निष्क्रमस्वेति पुनः पुनरुवाच ह” भा०व० ९९अ०।

अभि+निर्(स्)+आभिमुख्येन निःसरणे। “अभिनिष्क्रामति द्वारम्” पा०। “स्रुघ्नमभिनिष्क्रामति शौघ्नं कान्यकुब्जद्वारम्” सि० कौ० “प्रविश्य चाभिनिष्क्रान्तं सुग्रीवं वानरर्षभाः” राम० किष्कि० २५अ०

वि+निर्(स्)+विशेषेण निःसरणे “यथा प्रविश्यान्तरमन्तकस्य को वै मनुष्योहि विनिष्क्रमेत” भा०व०१०२७३अ०।

परा+बलेनाक्रमणे आत्म० सक०। “यत्र तपः पराक्रम्य व्रतं धारयत्युत्तरम्” अथ० १०।७।११। अप्रतिबन्धादौ उपोपसर्गवत्। तत्रोत्साहे “पानीयार्थं पराक्रान्ता यत्र ते भ्रातरोद्गताः” भा० महा० ९१श्लो०। पराक्रमः।

परि+भ्रमणे अक०। “परिक्रामति संसारे चक्रवत् बहुवेदनः” भा० व० २०८अ०। परितोगमने सक०। “परिक्रामति यः सर्वांल्लोकान् संत्रासयन् बलात्” भा० ८६।१३।२०।

सम्+परि+सम्यक् वेष्टनाकारेण परितो गमने सक० “बहूनि संपरिक्रम्य तीर्थान्यायतनानि च” भा० आ० १२श्लो० पर्य्यटने अक०

प्र+आरम्भे आत्म०। “प्रचक्रमे वक्तुमनुज्झितक्रमः” रघुः। अनारम्भे तु न आत्म० “विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रामन्ति” भाग०५,२२। १७श्लो०।

प्रति+प्रतिरूपक्रमे सक० “यं स्रुवेण प्रतिक्रामति” शत० ब्रा० २।४।४।९। प्रतिकूलक्रमणे निवृत्तौ अक०। “भद्रे! प्रतिक्राम नियच्छ वाचम्” भा० व० २६८अ०।

वि+पादविहरणे अक०आत्म०। “साधु विक्रमते वाजी” सि०कौ० “त्रेधा विष्णुरुरुगायोविचक्रमे” तैत्ति०। पादाकरणके तु न तङ्। वाजिना विक्रामति। “ते विक्रमन्तः स्फुरता दृढेन विक्षिप्यमाणा धनुषा नरेन्द्राः” भा० आ० १८अ०। इत्यत्र न तङ् “ततएनं महादेवः पीड्य गात्रैः सुपीडितम्। तेजसा व्यक्रमद्रोषात् चेतस्तस्य विमोहयन्” भा० व० ३९अ०। दीर्घाभाव आर्षः। वीर्य्यातिशयेन पराक्रमे अक०। “ते यूयं त्वरिताः सर्वे विक्रमध्वं प्लवङ्गमाः” रामा० किष्कि० ५८अ०। तङ् आर्षः। एवं “बाञ्छ विक्रमसे जेतुम्” भा०स० १९६श्लो० तङ् आर्षः। “वेः पादविहरणे” पा० योगविभागाद्वा क्वचिदन्यत्रापि तङ् इत्यन्ये।

अधि+वि+आधिक्येन पराक्रमे “यजमानायाधिविक्रमस्व” कात्या० २३।३।१।

निर्+वि+विशेषेण निःसरणे। “भित्त्वा कुक्षिं निर्विचक्राम विप्रः” भा० आ० ७६अ०

सम्+एकत्रस्थितस्यान्यत्र संचरणे सक० “कार्मुकं तु परित्यज्य झषं (मकरम्) संक्रमते रविः” लि०त०भवि० पु०। “रविसंक्रान्तिरेव च” तत्रैव। “जीवः संक्रमतेऽन्यत्र कर्म्मबन्धनिबन्धनः” भा०व०२०८अ०। तङार्षः। “औपसर्गिकरोगाः सक्रामन्ति नरान्नरम्” सुश्रु०। “संक्रामन्ति हि पापानि तैलविन्दुरिवाम्भसि” पराशरः “कालोह्ययं संक्रमितुं द्वितीयम्” रघुः। सम्यक् क्रमणे सक० “संक्रामन्तौ बहून् देशान् शैलांश्च वनानि च” रामा० आर० ७६अ०।

अनु+सम्+आनुकूल्येण आनुपूर्व्येण च संक्रमणे। “इष्टापूर्त्तमनुसंक्राम विद्वन्!” अथ० १८।२।५।

उप+सम्+सामीप्येन संक्रमणे सक० “अविशेषणे हि विधि-